ङ) भरत-लक्षण-शत्रुघ्नानां पत्नीनां नामान्युल्लिख्यन्ताम्।

३. संस्कृतभाषया देवनागरीलिपिमाश्रित्य सप्रसङ्गं व्याख्या कार्या। 4

क) हा हा धिक्परगृहवासदूषणं यद्वैदेह्याः प्रशमितमद्भुतैरुपायैः।
एतत्तत्पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसृतम्॥

**अथवा**

ख) वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥

**ख-विभागः**

४. मृच्छकटिकमिति दृश्यकाव्यस्य द्वितीयाङ्के संवाहकस्य चरित्रोपस्थापनेन यत्समाजचित्रं प्रकाशितं तदेव स्वभाषया लेखनीयम्। 5

५. प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 5

क) द्वयमिदमतीव लोके प्रियं नराणां सुहृद्वनिता च।
सम्प्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः॥

**अथवा**

ख) 'शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता।'

६. अधोलिखिताः प्रश्नाः सुरगिरा देवनागरीलिपिमाश्रित्य समाधेयाः।

क) 'आलाने गृह्यते हस्ती...हृदये गृह्यते नारी'—कमुद्दिश्य कदा वा वक्ता इदमुक्तवान्? $\frac{1}{2}+1+\frac{1}{2}$

ख) 'गुणशस्त्रैर्वयं येन शस्त्रवन्तोऽपि निर्जिताः'—कदा केनोक्तमिदम्? 'गुणशस्त्रैः' इति पदे कोऽलंकारः? $1+\frac{1}{2}+\frac{1}{2}$

ग) 'छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते'—केनोक्तमिदम्? अत्र चन्द्रलेखया सह का तुल्यते? $\frac{1}{2}+\frac{1}{2}$

Ex/SANS/PG/2.3/2022

# Master of Arts Examination, 2022

( 1st Year, 2nd Semester )

## SANSKRIT

### Course – VIII

### ( Sanskrit Drama )

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

**क-विभागः**

१. 'सा त्वमम्ब! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।' कस्मिन् प्रसङ्गे केन चोक्तमिदम्? 'सा त्वमम्ब'-इत्यनेन किं ज्ञापितम्? अरुन्धती का आसीत्? प्रसङ्गस्यास्योपस्थापनेन यन्नाटकीयतात्पर्यं सूचितं तत्समासतो वर्णनीयम्। $1+\frac{1}{2}+2+\frac{1}{2}+4=8$

**अथवा**

राम-सीतयो र्दाम्पत्यप्रेमभावनायाः यन्माहात्म्यमुत्तररामचरितमिति नाटकस्य प्रथमाङ्के प्रकटितं तत्समासतो लेखनीयम्। तयोरेतादृशदाम्पत्यप्रेमभावनाया माहात्म्योपस्थापनेन किं नाट्यप्रयोजनं साधितं कविना? $5\frac{1}{2}+2\frac{1}{2}$

२. **त्रयस्यो**त्तरं सुरगिरा देवनागर्या लिप्या च लेखनीयम्। $1\times3$

क) रामस्याश्वमेधयज्ञे कः पुरोहितः, का च सहधर्मचारिणी आस्ताम्?

ख) ऋष्यशृङ्गेण विसर्जिताः गुरवः कुत्र गताः? किमर्थञ्च?

ग) भगवान् भूतभावनः पद्मयोनिः वाल्मीकिमृषिमुपसंगम्य किमवोचत्?

घ) 'अये! मध्यमाम्बावृत्तान्तमन्तरितमार्येण।' —अत्र किमर्थमार्येण मध्यमाम्बावृत्तान्तमन्तरितम्?